[1]बध्नन्-ती, [2]बन्धयन्-न्ती, बिभन्त्सन्-न्ती ; —
[3]भन्त्स्यन्-न्ती-ती, बन्धयिषयन्-न्ती-ती, बिभन्त्सिष्यन्-न्ती-ती ; —
— बन्धयमानः, बन्धयिष्यमाणः, — बाबध्यमानः, बाबधिष्यमाणः ;
[4]भत्-भध्-बधौ-बधः ; — — —
बद्धः-बद्धम्-बद्धवान्, [5]चक्रबद्धः-दृषद्बद्धः, बन्धितः, बिभन्त्सितः,
बाबधितः-तवान् ;
बन्धः, [6]सुतानुबन्धः,[A] बन्धः, बिभन्त्सुः, बाबन्धः ;
बन्द्धव्यम्, बन्धयितव्यम्, बिभन्त्सितव्यम्, बाबधितव्यम् ;
बन्धनीयम्, बन्धनीयम्, बिभन्त्सनीयम्, बाबधनीयम्,
बन्ध्यम्, बन्ध्यम्, बिभन्त्स्यम्, बाबध्यम् ;
ईषद्बन्धः-दुर्बन्धः-सुबन्धः ; — —
बध्यमानः, बन्ध्यमानः, बिभन्त्स्यमानः, बाबध्यमानः ;
बन्धः, [7]पर्यङ्कबन्धः, चक्रबन्धः, दृषद्बन्धः, [8]अनूबन्धः, बन्धः,
बिभन्त्सः, बाबधः ;
बन्द्धुम्, बन्धयितुम्, बिभन्त्सितुम्, बाबधितुम् ;

---

1. शतरि, क्र्यादित्वात् श्नाप्रत्यये, 'अनिदिताम्—' (6-4-24) इति धातुनकारलोपे, 'श्नाऽभ्यस्तयोः—' (6-4-112) इत्याकारलोपे च रूपमेवम्।
2. चित्तवत्कर्तृकत्वविवक्षायाम् ण्यन्तेऽत्र परस्मैपदमेव। अचित्तवत्कर्तृकत्वविवक्षायां तु आत्मनेपदमपि भवतीति ज्ञेयम्।
3. स्यप्रत्ययेऽपि भष्भावचर्त्वादिकं यथायथमूह्यम्।
4. क्विपि, उपधानकारलोपे, भष्भावचर्त्वविकल्पयो रूपम्।
5. क्तप्रत्ययान्तात्, 'सप्तमी—' (2-3-36) इति योगविभागात् समासः।
6. सुतमनुबध्नातीति **सुतानुबन्धः**। 'कर्मण्यण्' (3-2-1) इत्यण्।
7. पर्यङ्के बन्धः **पर्यङ्कबन्धः**। 'सिद्धशुष्कपक्वबन्धैश्च' (2-1-41) इति सप्तमीतत्पुरुषः। 'तत्पुरुषे कृति—' (6-3-14) इति प्राप्तस्यालुकः 'नेन्सिद्धबध्नातिषु च' (6-3-19) इति निषेधः।
8. अनु बध्यते इत्यनूबन्धः = प्रत्ययगतः कित्त्वङित्त्वादिर्विशेषः। 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6-3-122) इति दीर्घः।

A. 'ज्ञाताशयस्तस्य ततो व्यतानीत् स कर्मठः कर्म **सुतानुबन्धम्**॥' भ. का. 1.11. (अत्र कर्मण्यणि **सुतानुबन्धम्** इति नपुंसकलिङ्गश्रवणासम्भवात् व्याख्यातृभिः **सुतानुबन्धि** इति पाठमाश्रित्य, तस्य च सुतमनुबन्धुं शीलमस्येति व्युत्पत्त्या ताच्छील्येऽर्थे णिनिप्रत्ययान्तत्वमिति समर्थितम्। तदेव च साध्विति प्रतिभाति।